# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – मनुस्मृतिः ११-१२ अध्यायौ | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत्॥

२ ख्यापने नानुतापेन तपसाऽध्ययने न च।
पापकृन्मुच्यते पापात्तथा दानेन चापदि॥

३ देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवते॥

**प्रश्नः २ मनुस्मृतिग्रन्थाधारेण प्रायश्चित्तविषये किं किं कथितम्? वर्णयत।**

**प्रश्नः ३ पञ्चमहापापानि उपपातकानि च वर्णयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते।
तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत्॥

२ ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजेत्।
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च॥

३ धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।
तस्मात्समागमे तेषामेनो विख्याप्य शुद्ध्यति॥

**प्रश्नः ५ प्राजापत्यादीनि तथा चान्द्रायणादिव्रतविधिं विलिख्य तन्महत्त्वञ्च प्रतिपादयत।**

**प्रश्नः ६ सत्वादिगुणत्रयलक्षणानि विलिख्य तेषां महत्त्वं च प्रतिपादयत।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥

२ पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥

३ या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्कलाः प्रेत्य तमोनिष्ठाहिताः स्मृताः ॥

**प्रश्नः ८ वेदानां महत्त्वं प्रतिपाद्य ब्राह्मणस्य जन्मसाफल्यं कया रीत्या भवति तद् यथाग्रन्थं लिखत ।**

**प्रश्नः ९ 'यं शिष्टा ब्राह्मणाः ब्रूयुः स धर्मः' वाक्यमिदं चर्चयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ मनुस्मृतौ कति अध्यायाः सन्ति ?
२ कतिवर्णाः ? के च ते ?
३ कति आश्रमाः ? के च ते ?
४ पञ्चमहाभूतनामानि लिखत ।
५ विद्यया किम् अश्नुते ?
६ कः धर्मः ?
७ धर्मपरिषदि कति ब्राह्मणाः ग्राह्याः ?
८ मनुस्मृतेः अपरं नाम किम् अस्ति ?
९ पितृदेवमनुष्याणां चक्षुः कः उच्यते ?
१० श्रेयस्करतरं कर्म किम् ?
११ धान्यं हृत्वा (चौर्यं कृत्वा) जनः द्वितीयजन्मनि किं भवति ?
१२ सुरापः इत्यस्य शब्दस्य कोऽर्थः ?
१३ शुभान् गन्धान् (अत्तरं) अपहर्ता द्वितीयजन्मनि किं भवति ?
१४ कः वाग्दण्डः उच्यते ?
१५ उत्तममध्यमाधमगतयो नृणां केन भवति ?

****